॥इतिदर्शपूर्णमासयोःप्रायश्चित्तानि॥

श्रीगणेशायनमः॥ अथदर्शपूर्णमासयोः प्राप्तश्चित्तानिरूप्यंतेहिरण्यकेशिसूत्रानुसारेण॥ ग
आरंभात्रयाजांतकर्ममध्येएकमनेकंवाविस्मृत्याग्रिमकर्मकरणोत्तरंस्मरणेसतित्वन्नोअग्नेसत्वन्नोअग्नेसर्वप्रायश्चित्तंवहुत्वा
अनाज्ञानत्रयजपंहुत्वाविस्मृतंकर्मपुनःकर्त्तव्यं॥ऐष्टिकाज्येसतिनाज्यसंस्कारः॥असतिस्मार्त्तवदाज्यंसंस्कृत्यजुहूंहोमः॥ व
व्याहृतायांस्रुवेण॥प्रोक्षणादिसंस्कारलोपेमंत्रलोपेमंत्राणांविपर्यासेचएवमेवप्रायश्चित्तंकृत्वालुप्तसंस्कारमंत्रजपंकुर्यात्॥ स
अनेकप्राधानिकेयागेएकस्थानेकस्यवाप्रधानद्रव्यस्यानुत्पादनेसतियागात्पूर्वंस्मरणेएतदेवप्रायश्चित्तंकृत्वापुनरुत्पाद्यसहैवयागः॥ आकर्मसमाप्तेःस्वराक्षरपदवर्णलोपेआभिर्गीर्भिरितिप्रायश्चित्तांतेआहुतिंजुहुयात्॥सर्वप्रायश्चित्तमनाज्ञानजपोविष्णुस्मरणंच॥अनेकप्रधानानांमध्येएकस्थानेकस्यवालोपेकर्मसमाप्त्यनंतरंज्ञानेत्वन्नोअग्नेसत्वन्नोअग्नेसर्वप्रायश्चित्तमनाज्ञानजपंविष्णुस्मरणंचकृत्वांतरितंसांगंप्रधानंकुर्यात्॥होतापराकृतदेवताज्ञानमध्येअपराकृत्यैवतांप्रमादादावाहयेत्तदासर्वप्रायश्चित्तानाज्ञानजपंविष्णुस्मरणानिकृत्वाआहूतप्रदेशेतद्देवतायाज्यापुरोनुवाक्याभ्यांआ
हूतप्रदेशेआज्येनयागः॥प्राक्तदेवतायाःकस्याश्चिदनाज्ञानेसतितद्देवतायागात्पूर्वंज्ञानेत्वन्नोअग्नेसत्वन्नोअग्नेसर्वप्रा त
यश्चित्तमनाज्ञानजपंविष्णुस्मरणंचकृत्वातांदेवतामावाहयेत्॥यागोत्तरंज्ञानेप्रायश्चित्तमेवनावाहनं॥यजमानःपत्नी

वाप्रादुष्करणप्रभृतिहोमात्पूर्वंअग्नीयादुक्षयेत्सिवेहुतदाज्यसंस्कारपूर्वकंयत्तेवयंयथाहुतदसवइत्याहवनीयेआ
हुतिहुत्वाघृतपतीष्टिस्थानेपूर्णाहुतिंवाहुत्वाहोमंकुर्यात्॥सूर्यास्तमयेउदयेवायजमानःस्नातश्चेत्तूष्णींसं ज्य
स्कारादिकृत्वाआहवनीयेयन्मआत्मनोभिदाभूत्पुनरग्निश्चक्षुरदादित्यहुतिहुत्वंजुहोति॥प्रातश्चेदनभ्रमायंकालपर्यंतंवाग्यतस्तिष्ठेत्॥सायंचेद्रात्रावेवं॥अथाग्न्यनुगमनप्रायश्चित्तं॥अनन्वाहितगार्हपत्योनुगतश्चेदुल्मनारणी
संस्पृश्यमथित्वायतनादुल्मनिष्कृत्यायतनंगोमयेनोपलिप्यायतनेग्निंस्थापयित्वापुष्टंकृत्वाप्रज्वाल्यपश्चादुपवि
श्यदेशकालौस्मृत्वागार्हपत्यानुगमननिमित्तकप्रायश्चित्तंतपस्वतीष्टिस्थानेमित्रादिदादत्राहुतीर्होष्यामितिसं
कल्प्यगार्हपत्येस्मार्त्तवदाज्यंसंस्कृत्यस्रुवंजुहूंचसंमृज्याहवनीयंपरिस्तीर्यपरिषिच्यस्रुविहादत्राग्रहीतंग्रहीत्वा
दर्शसमिधोभ्याधायाग्नेणाहवनीयंपरीत्यदक्षिणतस्तिष्ठन्विघ्राहंजुहोति॥एषदर्विहोमधर्मःसर्वधर्मेषु॥
मित्रायस्वाहामित्रायेदंनमम॥वरुणायस्वाहा।वरुणायेदं॥सोमायस्वा॰सोमायेदं॥सूर्यायस्वाहा।सूर्यायेदं॥अग्नयेतपस्वतेजनहृतेपावकव्रतेस्वाहा॰अग्नयेतपस्वतेजनहृतेपावकव्रतइदं॥अग्नयेसु

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

अग्नयेव्रतपतयेइदं॥
चयेस्वाहा॥अग्नयेशुचयइदं॥अग्नयेज्योतिष्मतेस्वाहा।अग्नयेज्योतिष्मतइदं॥अग्नयेव्रतपतयेस्वाहा॥
भूस्वाहा।अग्नयइदं॰भुवःस्वाहा।वायवइदं॰सुवःस्वाहासूर्यायेदं॰भूर्भुवःसुवःस्वाहाप्रजापतयइदं॰॥ए
ताहादशाहुतीर्हुत्वासादुण्यायविष्णुंस्मरेत्॥इतिगार्हपत्यानुगमनप्रायश्चित्तं॥इदमेवाहवनीयानुगमन
प्रायश्चित्तं॥अत्रकेचनगार्हपत्यात्स्रुक्स्रुवौप्रणयनमिच्छंति॥आहवनीयस्यनमंथनंताभ्यांस्यं॥भस्मनारणीसंस्पृ
श्यमंथनं॥भस्मस्पर्शनसमयेअयंतेयोनिरितिमंत्रंपठेत्॥मंथन्नोत्तरंजातेत्रोउपावरोहेतिमंत्रंपठेत्॥आ
हवनीयमंथनेलौकिकेअरणीप्राह्रतेवा।इत्याहवनीयानुगमनप्रायश्चित्तं॥अथदक्षिणाग्न्यनुगमनप्राय
श्चित्तं॥आयतनात्भस्मनिष्कृष्यगोमयेनोपलिप्ययोनितःसाद्यस्रुक्स्रुवौमायतनेनिधायप्रज्वाल्यसर्वप्रा
यश्चित्तमाहवनीयेजुहोति।विष्णुस्मरणंच॥इतिदक्षिणाग्न्यनुगमनप्रायश्चित्तं॥अथसर्वेषामनुगमनप्रा
यश्चित्तानामपवादत्वेनान्वाहितप्रायश्चित्तंनिरूप्यते॥अथान्वाहिताहवनीयानुगमनप्रायश्चित्तं॥मंथ

नपक्षेभस्मनारणीसंस्पृश्यमथित्वायतनमुपलिप्यस्रुक्स्रुवौनिधायाज्यंसंस्कृत्यस्रुवाहुतिंजुहोति॥योअ
ग्निरेवंवीतयेहविष्मांश्चविवासति॥तस्मेपावकमडयस्वाहा॥अग्नयइदं॰गार्हपत्यायहुत्वास्रुक्स्रुवौप्रणयनं॥अ
ग्निनाग्निरितिमंत्रेणवा॥ततःस्रुक्स्रुवौसर्वप्रायश्चित्तंचहुत्वानाज्ञातजपंविष्णुस्मरणंच॥भूरितिमनसो
पतिष्ठेध्वर्युर्यजमानश्च॥अग्नेव्रतपतइतिचत्वारियजूंषिमनसाजपेत्यजमानः।प्रवसतियजमानोध्व
र्युरेवजपेत्॥असत्यध्वर्यौभूरित्युपस्थानंयजमानएवकुर्यात्॥एवमिदमेवान्वाहितगार्हपत्यानु
गमनेप्रणयनवर्जं॥स्रुक्स्रुवाहुतिस्तुगार्हपत्यइतिविशेषः॥अन्वाहितदक्षिणाग्न्यनुगमनेस्वयोनितआ
हवनीयंतूष्णीमायतनेप्रतिष्ठाप्यपूर्ववत्स्रुक्स्रुवौडुलोपस्थानादिकुर्यात्॥स्रुक्स्रुवाहुतिरप्याहवनीयइतिकेचि
त्॥इत्यन्वाहिताग्न्यनुगमनप्रायश्चित्तं॥अन्वाधानप्रभृतिइष्टिसमाप्तिपर्यंतंअनुगमनेन्वाहितप्रायश्चित्त
मेव॥नान्यत्॥अथदर्शपूर्णमासातिपत्तिनैमित्तकपाथिकृतीष्यापस्तंबोक्तसमानतंत्रतापक्षमाश्रित्य

प्रयोगोभिधीयते॥ पर्वणोयश्चतुर्थोंशआद्याःप्रतिपदस्त्रयः॥ इष्टिकालःसविज्ञेयःप्रातरुक्तोमनीषिभिः॥ इत्यस्ययाग
कालस्यानिपातौपाधिकदेवनानिपन्नयागः॥ गौणकालस्तुपौर्णमास्यादर्शपर्यंतंदर्शेष्टेःपौर्णमासपर्यंतं॥ गौ
णकालातिपत्तौइष्ट्यसामर्थ्येइष्टिस्थानेआश्वलायनोक्तापूर्णाहुतिःकर्त्तव्या॥ साचेत्थं॥ पौर्णमास्यतिपत्तिजनि
तप्रसवायपरिहारार्थंपाथिकतीष्टिस्थानेपूर्णाहुतिंहोष्यामि॥ आज्यसंस्कारादिचतुर्गृहीतेनस्रुचंपूरयित्वाअ
ग्नयेपथिकृतेस्वाहा॥ आहवनीयेजुहोति॥ अग्नयेपथिकृतइदं॥ सर्वप्रायश्चित्तंहुत्वाज्ञातजपंविष्णुस्मरणंच
कुर्यात्॥ एवंसर्वप्रायश्चित्ते ष्टीनास्थानेतन्नदेवत्तायेचतुर्थ्यंतनाम्नाकर्त्तव्यासर्वप्रायश्चित्तसहिता एवंदर्शेपि
॥ अथेष्टिप्रयोगः॥ पौर्णमासेष्यतिपत्तिज नितदोषपरिहारार्थंपाथिकतीष्ट्यायक्ष्ये॥ ममाग्ने॰अद्ययज्ञाय॰
इमामूर्जं॰यथातिथि॰ऐष्टुंहविः॰। कालतस्तंत्रं॰अष्टौकपालानि॥ अग्नयेपथिकृतेजुष्टंनिर्वपामि॥ अग्नयेप
थिकृतेवो जुष्टंप्रोक्षामि॥ यथाभागंनिर्देशः॥ अग्न॰जुष्टमभिघारयामि॥ अग्नयेपथिकृतेनुब्रूहि॥ वेत्थाहवेधो

अध्वनःपथश्चदेवांजसा॥ अग्नेयज्ञेषुसत्क्रतोमू॥ आश्रा३॰ अस्तुश्रौ३॰ अग्निंपथिकृतंयज॥ येयजामहेग्निंपथिकृतं
आदेवानामपिपंथामगन्मयच्छक्रवामतदनुप्रवोढुं॥ अग्निर्विद्वान्त्सयजात्सेदुहोतासोअध्वरान्त्सऋतून्क ल्पया
ति३वोषट्॥ अग्नयेपथिकृतइदंनमम॥ अग्नेः पथिकृतोहंदेवयज्ययान्नादोभूयासं॥ अयमनड्वानमुतस्य
पूर्ण॰ तेनानड्वाहंतिनराणिमृक्षं॥ अयंवोनड्वानहिंसंतोयथाभागंप्रतिगृह्णीध्वं॥ नहविःशेषः॥ पावमणवर्जंसंति
ष्ठते॥ अथसमानतंत्रप्रयोगः॥ कालातिपत्तिप्रसवायपरिहारार्थंपाथिकृतीष्ट्यासमानतंत्रंकुर्वन्पाथिकृती
पूर्वकपौर्णमासेष्ट्यायक्ष्ये॥ आग्नेयनिर्वापात्पूर्वंपाथिकान्निर्वापः॥ अग्नयेपथिकृतेग्नयेवोजुष्टंप्रोक्षा म्यग्नी
षोमाभ्यामित्यादि॥ पथिकृताप्रचर्याग्नेयेनप्रचरति॥ दक्षिणाकालेऽन्वाहार्येणसहा■नड्वानपिदेयः॥
एवममावास्यायाम्॥ इतिपथिकृत्समानतंत्राप्रकृतिः॥ अथव्रतलोपेप्रवासेचव्रातपत्नीष्टिःपूर्णाहुतिर्वा॥
यदाकदाचिदर्वाकृत्साम्यापरासात्यस्याग्नेरायतनाद्बहिरग्निर्नि र्गतःप्रत्यानयनसमर्थश्चेत्॥ इदंतए

कंपरशुनएकंतृतीयेनज्योतिषासंविशस्व॥संवेशानस्तनुवेचारुरेधिप्रियादेवानांपरमेसधस्थे॥अनेनमंत्रेणायत
नंप्रत्यानीयाज्यंसंस्कृत्यस्रुक्चासर्वप्रायश्चित्तमाहवनीयेजुहुयात्॥अनाज्ञातजपोविष्णुस्मरणंच॥परिधिप
रिदानोत्तरंस्कंदतादानात्पूर्वंआहवनीयांगारस्यप्रत्याहरणसमर्थस्यप्रागादिदिक्षुबहिःपरिधिस्कंदनप्रा
यश्चित्तं॥यदिपुरस्तात्स्कंदेत्तदामातमोमायज्ञस्यमन्मायज्ञमानस्तमनमस्तेअस्त्वायतेनमोरुद्रपराय
तेनमोयत्रनिषीदस्यध्वर्युमाहिꣳसीर्यजमानंमाहिꣳसीः॥तमंगारंस्रुवबुध्नेनपीडयित्वा।सहस्रशृंगो
वृषभोजातवेदास्तोमपृष्ठोघृतवान्नक्रतीकः॥मानोहासीमेथितोतेत्वाजहामगोपोषंनोवीरपोषंच
यच्छ॥पत्नीतमंगारमाहवनीयेनुप्रहरेत्॥पत्न्यसंनिधौअध्वर्युःसर्वप्रायश्चित्तंजुहुयात्अथवा
तूष्णीमाहृत्यसहस्रशृंगइतिजुहुयात्॥जातवेदसइदंएवमेवदक्षिणादिषुमंत्रसंज्ञामेविशेषः॥
मातमोमानिषीदसिब्रह्माणंमाहिꣳसीर्यजमानंमाहिꣳसीरितिदक्षिणतः॥मातमोमादसिहोता ४

रंमाहीꣳसीःपत्नींमाहिꣳसीर्यजमानंमाहिꣳसीरितिपश्चात्॥मातमोदसिआग्नीध्रंमाहिꣳसीःपशून्माहिꣳ
सीर्यजमानंमानंमाहिꣳसीरित्यत्तरतः॥इतिपुराप्रयाजेभ्योंगारस्कंदनप्रायश्चित्तं॥अथगार्हपत्याहवनी
ययोरंतराश्वःपुरुषोगौर्वराहएडकोवागच्छेत्॥अविधिनातत्रप्रायश्चित्तं॥गतस्यपदेऽपोनक्तिषिंचयागार्ह
पत्यादुस्मादाय॥इदंविष्णुर्मंत्रेणाहवनीयपर्यंतंभस्माक्षिपनिभस्मपदंप्रच्छाद्यसर्वप्रायश्चित्तंकृत्वाविष्णु
स्मरेत्॥येनकेनजलादिनाप्रोक्षणपरिषेचनाधिश्रयणाद्युत्सेकेनवाअग्न्येकदेशोपघातेसति
पुनस्त्वादित्सन्दीपसमिंधनंकृत्वानाज्ञातजपश्च॥यदाकदाचित्स्वयंप्रज्वलितेग्नौ।उद्धृत्यस्वज्ञानवेदो
मानोहिꣳसीज्जानवेदइतिद्वाभ्यांउपसमिंधनंकृत्वानाज्ञातजपंकुर्यात्॥अथाज्यस्कंदनप्रायश्चित्तं॥
यद्याज्यंनिर्वपणोत्तरंस्रुवनात्पूर्वंस्कंदेत्तदाअध्वर्यवेवरोदेयः॥ततोऽध्वर्युःक्रोशंजनमगन्यज्ञस्तोमाय
ज्ञस्यारीरागच्छतु॥पितृन्क्रोशंनमगन्यज्ञस्तोमायज्ञस्यारीरागच्छतु॥गंधर्वंक्रोशंनमगन्यज्ञ॰अयोजनमगन्यज्ञस्त॰ओषधीर्ज्ञस्

मगन्नू० वनस्पतीन्जनमगन्य॰पंचजनान्जनमग॰दिशोजनमगन्यज्ञ॰एतैरृषभिर्मेस्कन्नमनुमंत्रयेत॥
यदाउत्सूयमानंस्कंदेत्तदाऽध्वर्यवेऽज्ञामश्वंगांवादद्यात्॥तदभावेवरः॥देवांजनमृगान्नितिपूर्ववदनुमंत्र
णं॥यदिस्कंगात्तंस्कंदेत्तदावरंदत्वाभूपतयेस्वाहा॰स्कंनस्यपुरस्तात्प्रादेशंकुर्यात्॥भुवनपतयेस्वाहा॥
दक्षिणतः॥भूतानांपतयेस्वाहा॰पश्चात्॥भूतायस्वाहाउत्तरतः॥भूर्भुवःसुवः ऊर्ध्वं॥इतिप्रादेशा
न्विधाय।संत्वासिंवामियजुषाप्रजामायुर्धनंच॥स्कंनोपरिजलंसिंचंति॥यज्ञस्यत्वाप्रमथाभिमथाविम
योन्नयापरिगृह्णामि।श्रुचिर्देशस्त्रुग्ग्रहणयोग्यंचेत्पुनःस्कंचिग्रहीयात्॥अयोग्यंचेदभिमंत्रय
न्॥यद्यित्सूतंग्रहणात्पूर्वंस्कंदेत्तदास्वग्रहेयसुष्कलंतदध्वर्यवेदत्वापूर्ववदनुमंत्रणं॥× एवंनिरूढह
विस्कंदने॥अथदेवतार्थंजुहुयात्[illegible]हस्तेवास्रुवेवाग्रहीतंअहुतंस्कंदेत्तत्रप्रायश्चित्तं॥यजमानस्यग्र
हेयत्नवकुमूल्यंतदध्वर्यवेदद्यंवरोवा।पूर्ववत्स्कंदनेप्रायश्चित्तंकृत्वाग्रहणयोग्यंचेद्ग्राह्यं।ग्रहणा

समर्थंचे[illegible]त्स्थानात्पुनरवदानंगृहीत्वायागःकर्त्तव्यः॥एवंकीरामेध्यसंस्पर्शादिनानुद्रष्ट
व्यं॥अथयदिअभागांदेवतांनिर्वापप्रोक्षणविभागनिर्देशाभिघारणावाहनप्रेषादोउपलक्षयेत्तदा॥पु
नर्भागिनीतासिद्रव्येउपलक्षयित्वायहोदेवाइत्याकृतिंहुत्वाऽभागांदेवतांयाज्यापुरोनुवाक्याभ्याचतुर्थ्यं
तनाम्नास्वाहाकारांतेनेष्वाभागिनीयथाप्रकृतियजेत्॥होतुराह्वानेभागिनीयत्रावाहयेत्तत्तस्मिन्त्र
देशेयागः॥पूर्ववत्प्रायश्चित्तं॥एवमेवभागिन्यनावाहनेयत्रस्मरणंतत्रैवोत्थायावाहयेत्॥पूर्ववत्प्राय
श्चित्तंकृत्वायथाप्रकृतियजेत्॥यदास्वाहाकारप्रदानयोर्व्यत्यासस्तदामनोज्योतिरितिजुहुयात्॥
मनसेज्योतिषइदंगदेवतयोर्व्युत्क्रमेणयागेऽवदानविपर्यासेयाज्यापुरोनुवाक्याविपर्यासेत्वंनोअ
ग्नेसत्वंन्नोअग्नेइतिसतंतिंजुहोति।एवंसर्वविपर्यासेद्रष्टव्यमनुक्तप्रायश्चित्तस्थले[illegible]॥अथासा
द्नोन्नरंउपधानालाकूकयाभेलेदनानोप्रायश्चित्तं।गायत्र्यात्वाशनाक्षरयासंदधामि।इतितानिशकलानि

संधायअभिन्नोघर्मो॰अनुसंचरंतिइत्यग्निमंत्र्यभूमिभूमीतिब्रह्मणाग्निमंत्रणेकृतेऽपाक्षिपेत्॥अन्यत्कपालंसा
दनसंस्पर्शनप्रोक्षणैःसंस्कृत्यघर्मोदेवाᳬअप्येतुइतिपूर्ववत्स्रुयुक्तेष्वपिस्रुजतिं।ततःमहीद्यौरित्याहुतिंजु
होति।द्यावापृथिवीभ्यामिदं॰इष्टयसंभवे।इष्टिस्तुआग्निनंदिकपालंनिर्वपेद्द्यावापृथिव्यमेकंकपालंइत्या
ग्नेयवत्एककपालधर्माः॥उपहितानांमध्येभेदनेपूर्ववत्संधानाभिमंत्रणंकृत्वाप्रक्षिप्यपूर्ववदन्य
त्संस्कृत्यघर्मोदेवाᳬअप्येतिस्थानउपदधाति॥पूर्ववत्स्रायश्चित्तंकुर्यात्॥अपहारादिनाअदृश्येऽन्य
त्कपालमासादनसंस्पर्शनप्रोक्षणैःअनुहनसंस्कृत्यउपहितानांवेत्याकृतमंत्रेणोपधायपूर्ववदिष्टिमाहुतिं
वाकुर्यात्॥पुरोडाशाधिश्रयणानंतरंनाशेसर्वप्रायश्चित्तमेव।नकपालोत्पत्तिः॥कपालभेदनाद्याप्रायश्चित्तं
॥अथकपालानामुपरिपत्नीसंयाजहोमकरणेप्रायश्चित्तं॥वैश्वानरेष्टिस्थानेचतुर्गृहीतेनअग्नयेवैश्वा
नराय स्वाहा॥इतिपूर्णाहुतिंहुत्वासर्वप्रायश्चित्तंवजुहुयात्॥किंचिदाज्यपतनेसर्वप्रायश्चित्तंनेर्णाहुतिः ६८
पू

अथहविषोव्यापत्तौकीटादिप्राणिमिश्रितकेशांगदाद्यामलयोगकाकश्वानस्पर्शचांडालरजस्वला
दृष्टस्पृष्टादिनाप्रायश्चित्तं॥यागात्पूर्वमेकस्यानेकस्यवाव्यापत्तौव्यापन्नमपकृनिक्षिप्यसर्वप्रायश्चित्तादि
कृत्वास्रुगादानादिनावदेव हविरुत्पाद्यसर्वेषांसहयागंकुर्यात्यागोत्तरंव्यापत्तौस्विष्टकृद्यागोक्रवा
ज्येन॥इडाद्याज्यस्थाल्याज्येननपुनर्यागः॥एवंसर्वहविषांसाज्यानांव्यापत्तावाज्यमात्रमुत्पाद्यचतुर्गृहीक
रणहविःशेषवर्ज्जमाज्येनेष्टिंसमाप्यपुनःकृत्स्नेष्टिःकर्त्तव्या।इतिहविर्व्यापत्तिप्रायश्चित्तं॥पौर्णमास्यां
संकल्पात्पूर्वंपत्नीरजस्वलाचेत्तस्यांस्नातायांपंचमेऽहिपथिकृन्मुखेनेष्टिःकर्त्तव्या॥संकल्पादुत्तरंचेद्रज
स्वलातर्हितांविहाययागःकर्त्तव्यः॥तस्यप्रयोगःप्रोक्षणीरासादयेतिप्रैषे।पत्नीसंनह्येत्यस्यलोपः॥
स्रुचश्चसम्मृज्याज्येनोदेहि।वेदःपश्चादुदगग्रंयोक्त्रंस्तृणीयात्।पत्नीमंत्राणांयजमानेनजपंकार्यः॥
संनहनाज्यावेक्षणप्रोक्षणीसंपादनस्रुक्संमार्जनाज्यसंस्कारोपस्थानोपवेशनानिनसंति॥होतुर्वेदोसीत्यादिमंत्राणांलोपःसमायुषेत्यं
२५वेदोसिघृतवंतमित्यनेर्यजमानस्यलोपः॥५२
पू

स्यलोपः॥होनांतंतुनन्वंनितिवेदंस्तएणाति॥तस्यांस्लानायांपंचमेह्निउपगमनसमये।अमूहमस्मि·सहीर्यायि॥इत्क
पट्टूयविस्लर्योनिमित्यादि।एवममावास्यायां।अथाग्न्याधानयागमध्येसूर्याचंद्रमसोर्ग्रहणेप्रधानात्पूर्वंउद्वयंतम
सस्पर्युदुत्यंचित्रेमितितिस्रआहुतीःसूर्यग्रहणेहुत्वाप्रधानंकुर्यात्॥नवोनवोयमादित्योइत्याहुतिद्वयंचंद्रग्रहणे।
अग्नीन्विहायदंपत्योःसहनद्यतिक्रमेऽग्नयोलौकिकाभवंति॥पुनराधानमेवप्रायश्चित्तं॥सूर्योदयास्तसम
येग्रामसीमातिक्रमणेपुनराधानमेव॥ऋत्विग्नांमध्येएकस्यानेवस्यवाउत्थेप्रधानात्सर्वेऋत्विग्लोपसंरव्यया
व्यस्तसमस्तव्याहृतिभिर्जुहुहोमः॥ अथपुरोडाशभेदनेपतनेवापुरोडाशभेदनप्रायश्चित्तंकरिष्ये॥किमुस्त
सिकिमुत्प्रोष्ठाःशांतःशांतेरिहागहि॥अधोरोयज्ञियोभूत्वासीदमासीदसदनंस्व॥इतिबर्हिषिनिधाय॥मा
हिंसीदेवत्रेषिनआज्येनतेजसाज्यमानःकिंचन[redacted]रिषः॥योगक्षेमस्यशांत्याअस्मिन्नासीदबर्हिषि।
इत्यभिमंत्र्यसर्वंप्रायश्चित्तं जुहुयात्॥इदंसर्वत्रयज्ञानांपुरोडाशस्यपतनादौप्रायश्चित्तंज्ञेयं॥एकएवाध्वर्यु
२ अस्था २ र्भवतितदापुराप्रयाजेभ्यःआज्याःस्रुवेणजुहोतिजुष्टोवाचोभूयासंसरस्वसाइदंइमामेवाश्विनायज्ञस्यय ७

द्वाचोयद्दुरिष्टं॥तदश्विनाभेषजेनसंदधाथांस्वाहा॥अश्विभ्यामिदं·त्रातारमिंद्र·इंद्रायेदं·यन्मेमनसश्छिद्रं
यद्वाचायश्चमेहृदः॥देवायज्ञमयंतुसर्वंसोमोबृहस्पतिश्चस्वाहा।देवेभ्यइदं·यद्दिद्वांसोयदविद्वांसमु
ग्धाःकुर्वंत्विज्ञः॥अग्निर्मोतस्मादेनसश्चंद्रादेवीचमुंचतांस्वाहा।अग्निश्चंद्राभ्यामिदंनमम॥यदंतरिक्षं
पृथिवीमुतद्यांश्अग्नयेगार्हपत्यायेदं॥ब्रह्मत्वेहोत्रेआध्वर्यवेआग्नीध्रेऽएवऋत्विक्पक्षेयत्क्षेयसर्वाणि॥ ॥ वै ४
तन्मेदेवारक्षंतांप्राणान्मेमाहिंसिषुःस्वाहा॥देवेभ्यइदंनमम॥इतिप्रायश्चित्तानिहुत्वाअंतर्वेद्यासीनःप्रया
जादिसर्वादेवतायजति॥एकएवयजमानश्चेन्पूर्ववत्समाहुतीर्हुत्वाअष्टमींजुहोति।अहंब्रह्माहंहोता
हमध्वर्युरहमाग्नीध्रोहंयजमानएकएवयज्ञपर्वाणि॥तन्मेदेवारक्षंतांप्राणान्मेमाहिंसिषुःस्वाहा॥दे
वेभ्यइदंअन्यत्समानंहोतवर्जंयजमानःसर्वंकरोति॥होताभिन्नश्चेन्नैतस्यायश्चित्तं॥इतिदर्शपूर्णमासप्रा
यश्चित्तं॥ ॥ ॥ ॥ ७ ॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

» इदं दर्शपूर्णमासप्रायश्चित्तपुस्तकं समाप्तं ॥